3935

TRIVANDRUM SANSKRIT SERIES.

No. CXXVIII.

Śrī Citrodayamañjarī.

No. XVII.

THE KUPPUSWAMI SASTRI RESEARCH INSTITUTE MADRAS-4

THE BHṚṄGASANDEŚA

OF

Vāsudeva

EDITED BY

K. SĀMBAŚIVA ŚĀSTRĪ

Curator of the Department for the Publication of Oriental Manuscripts Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1937.

(*All Rights Reserved.*)

3431

अनन्तशयनसंस्कृतग्रन्थावलिः।

ग्रन्थाङ्कः १२८.

श्रीचित्रोदयमञ्जरी।

ग्रन्थाङ्कः १७.

वासुदेवविरचितः

भृङ्गसन्देशः

पारम्पर्यग्रन्थप्रकाशनकार्याध्यक्षेण
के साम्बशिवशास्त्रिणा
संशोधितः।

सच
अनन्तशयन
राजाधिराजमहामहिमश्रीचित्रावतारमहाराजशौमनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितः।

कोल्लम्वर्षम् १११२. क्रिस्ताब्दः १९३७

3735

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदद्दिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

INTRODUCTION.

This work is celebrated by the name Bhṛṅgasandeśa based on its being the message sent, by one lover in separation, from Trivandrum to his beloved Bālanīli, residing in the house of Bālayakṣa in Śvetadurga Kottakkal in North Malabar) through a Bhṛṅga (beetle). Even though it bears another title Bhramarasandeśa, it can be known from the following line that the name intended by the poet was Bhṛṅgasandeśa :—

"आर्त्तो भृङ्गं कमपि पुरतो वीक्ष्य मन्दं वभाषे"।

(p. 2. verse 5.)

In the latter part again,

"तेनाश्वस्ता किमपि कुतुकाश्चर्यलज्जानुविद्धा
मुग्धा सम्मार्जयति नयने यावदस्राम्बुपूर्णे।
तावद् गत्वा सविधमयि कल्याणि! कान्तस्य दूतो
भृङ्गोऽस्मीति भ्रमर! निगदन् मञ्जु मञ्जीवयेथा ॥"

p. 27, v. 49.)

the poet addresses him by the word Bhramara and at the same time reminds him of his being a Bhṛṅga and so the intention of the poet seems worthy of minute consideration. The sending of a message to his beloved Bālanīli by the hero does not seem improbable. For, he was dropped down on the way by the Yakṣi, afraid of her consort, when he was being carried away from Śvetadurga to the peak of the Malaya amidst places, densely covered by trees creepers and arbours, and befitting only the Yakṣās and other heavenly beings.

"मासप्राप्यं मम दिनयुगेनाभिगम्यं तव स्या-
दस्या धीतं गुणगणसुधावीचिभिः श्वेतदुर्गम्।
स्यानन्दूराद् दृढमतिरतस्त्वं प्रतिष्ठस्व तस्मा-
दस्मानुत्तारयितुममुतः सङ्कटादुत्तराशाम् ॥"

(p. 4, v. 17.

The statement in this stanza that Trivandrum is away from Śvetadurga by one month's travel, is true, as there were no proper means of quick travelling in those days as there are at present. But the Bhṛṅga's completion of the journey in two days is due to some divine power.

The poet rightly mentions about this divine power at the beginning itself :—

"ब्रूमः श्रीमन्! मधुप! भवते स्वागतं वैजयन्त्याः
किं त्वं विष्णोरुरसि विकसद्विभ्रमायाः समायाः ।
धम्मिल्लाद् वा परिमलसमासक्तमत्तालिपाली-
केलीलोलद्भुतरुकलिकासुन्दरादिन्दिरायाः ॥"
(p. 2, v. 6.)

"सन्देशेऽस्मिन् कथमपि गुरुश्रीपदाम्भोजयुग्म-
ध्यानोद्भूतप्रबलतमसा वासुदेवेन बद्धे ।
पूर्णे दोषैरपि यदि गुणानां कणाः सम्प्रथेर-
न्नेतान् प्रीत्या मनसि परिगृह्णन्तु सन्तो महान्तः ॥" (p. 33.)

From the latter verse found at the close of the work it is clear that the author of this Sandeśa was a poet of the name Vāsudeva. If indeed the poet Vāsudeva, after reaching Trivandrum on pilgrimage, has composed this Kāvya to acquaint his own friends of literary taste with the places he had visited and other particulars concerned, under the guise of a message to his Lord, residing at Śvetadurga, he has in fact surpassed all others by consigning all his personal experiences to the swing of Poesy. Even Kālidāsa, the great poet, resorted to an imaginative theme in his Meghasandeśa, so that it appeals to the readers and that path opened by him has been trodden ever and anon by all the later poets. If the poet's personal experiences are given expression to in this, there is an exceptional excellence in his opening a new course in the field of literature by bringing the familiar places and well-known facts into poetic commerce.

There is not only one poet of the name Vāsudeva. The author of Yudhīṣṭhiravijaya and other works, that of works like Subhadrāharaṇa and the one of this Bṛṅgasandeśa are among them. Among these, I think, our poet is the latest and the author of the Yamakakāvya the oldest. In this Sandeśa the names of Śrī Nārāyaṇa Bhaṭṭapāda who is posterior to both the authors of the Yudhīṣṭhiravijaya and Subhadrāharaṇa and his contemporary Śrī Mārgabandhu are mentioned.

"हेरम्बेण प्रथितविभवां मातृदत्तद्विजेन्द्र-
श्रीमच्छिष्योत्कमुखनिरास्तृतां शास्त्रघोषैः ।
भारद्वारायणकविवचःस्यन्दमाधुर्यनन्द-
द्वाणीमन्दिरमतसुरभिलां याहि पाटीरवाटीम् ॥

सूक्तिं नारायणकविमुखाम्भोजनिष्यन्दमानां
पीत्वा वापीकमलमधुपः प्राक्तनिर्वेदभारः ।
बिम्बे भानोरपरगिरिशृङ्गेण सञ्चुम्ब्यमाने
लम्बेथास्त्वं भ्रमर! धरणौ वल्लभक्षोणिबन्धोः ॥"

(p. 17, v. 91-92.)

There is another evidence to support this view that the Nārāyaṇakavi mentioned in this work is the great poet and scholar Śrī Nārāyaṇa Bhaṭṭapāda of Melpuṭṭūr, the author of Nārāyaṇīya and other works.

"तस्मात् प्रत्यक् प्रहितनयनः कृष्णगेहाधिवासं
सर्वज्ञं तं प्रणम गिरिशं भक्तिमानच्युतं च ।
एकस्तावद् वहति शिरसि ज्योतिषामेकमेन्दुं
ज्योतिश्चक्रं निखिलमपरो धारयत्यन्तरङ्गे ॥"

(p. 17, v. 89.)

The author mentions the great astrologer Achyuta Piṣāroṭi who was the teacher of Śrī Bhaṭṭapāda himself. So it is almost definite that the poet lived in the former half of the 17th century A. D., which is the age of Śrī Nārāyaṇamuni, the disciple of Achyuta. The poet glorifies Śrī Vīra Ravivarma Kulaśekhara, the then king of Trivandrum in the following verse:

"राज्यं दृष्ट्वाकलय रविवर्मावनीन्द्रस्य सम्पत्-
प्राप्यं वाञ्यन्तरितविशिखोद्ग्रमग्रे समग्रम् ।
चिह्नोत्कीर्णं त्रिदशनिवहैः स्थूलनीलोपलौघै-
र्धाम्ना तुल्यं त्रिभुवनपतेर्धाम येन प्रतेने ॥"

p. 5, v. 24.)

So we can rest assured that his time was the same as that of Śrī Nārāyaṇa Bhaṭṭapāda. The following śloka shows that the work was composed after Śrī Nārāyaṇa Bhaṭṭapāda's regaining his health on his dedication of the Nārāyaṇīya, the hymns of praise abridging the Bhagavata, at the feet of Lord Kṛṣṇa of Guruvāyupura, and the Lord's being known as the Great Physician.

"इत्थं नुत्वा भुवनपितरौ तौ समामन्त्र्य तस्मा-
दस्मत्प्राणप्रियसख! समीराल्लयं शीलयेथाः ।
यस्मिन् देवः स्वयमपि महापावनः पावनाना-
मातङ्कानामुपशमयिता भासते वासुदेवः ॥"

(p. 15, v. 76.)

On reaching the temple of Vaikom,

वाताधूतारुणकिसलया: पुष्पिता कोलभृङ्गा:
स्तोकोत्कम्पिस्तबकनमितास्तत्र वल्लीमतल्ली: ।
दूरे दृष्ट्वा द्रुतमुपसरन् भृङ्ग ! वेत्तासि ताभ्यो
जातैर्गीतै: स्फुटजनपदैर्लासिका इत्युपान्ते ॥

(p. 11, v. 55.)

the Bhṛṅga thus seated, under the illusion of creepers, finally realises but they were the dancing girls, on hearing the song. It seems that this fact of the custom of dancing by Devadasis prevalent in those days, was the personal experience of the poet himself. I consider that the course of historical research on the then prevalent social customs pointed out here is not beyond the comprehension of those possessed of the power of investigation. We have done this much. Herein are appended the names of kings, poets and places glorified in this Sandeśa.

Ravi Varma Bhupa	Verse	24
Capital of the Kūpaka Princes	,,	25
Kolambadeśa	,,	27
River Sukhte	,,	28
Vallabhagrama	,,	29
The South Banks	,,	30
Udaya Mārāṇḍa	,,	30
River Kaupa	,,	32
Śrīkumāragrāma	,,	34
Kumaralaya	,,	36
The King Gōdavarma	,,	38
The Capital of Devanārayaṇa	,,	42
The King Ravi Varma	,,	45
The temple of Vaikom	,,	51
Pūrnatrayī	,,	60
River Churṇi	,,	61
The King Rāja Raja	,,	61
The Capital of Cochin	,,	62
Pañcaraṅganātha	,,	63
The King of Sahasindhu	,,	64
The King of Kurumba	,,	65
Gupaka	,,	66
Keralendra	,,	68
Saṅgamagrāma	,,	70
River Kulivini	,,	70
Vṛsādri	,,	73
Samīrālaya	,,	76

Netranārāyaṇa	Verse	79
Niḷānadi	,,	83
Nāvākṣetra	,,	86
Capital of the Chief of Sailābdhi	,,	88
Kundageham	,,	89
Achyuta	,,	89
King Vikrama	,,	90
The Brahman Maṛdatta	,,	91
Nārāyāṇakavi	,,	91
The king of Vallabhakṣoṇi	,,	92

Respectfully acknowledging our deep thankfulness Brahmaśrī Ravi Vāsudevan Namburippad of Aghoram from whom we procured the original manuscript, we place the work before the generous public

Trivandrum,
12-8-1112. K. SĀMBAŚIVA SĀSTRĪ.

3935

॥ श्रीः ॥

निवेदना ।

काव्यमिदं श्रीमदनन्तशयनाद् (Trivandrum) विरहिणा केनापि श्वेतदुर्गे (Kottakkal) बालयक्षाभिधाने भवने बालनीलीसंज्ञायै प्रेयस्यै भृङ्गमुखेन प्रेष्यमाणं सन्देशमास्पदीकृत्य भृङ्गसन्देशः प्रथते । सत्यपि भ्रमर-सन्देश इति नामान्तरे

"आर्तो भृङ्गं कमपि पुरतो वीक्ष्य मन्दं बभाषे ।"

पा० २. श्लो० ५.)

इति दर्शनात् कविकल्पितं नामधेयं भृङ्गसन्देश इत्येव लगति । उत्तरभागे —

"तेनाश्वस्ता किमपि कुतुकाश्चर्यलज्जानुविद्धा
मुग्धा सम्मार्जयति नयने यावदस्राम्बुपूर्णे ।
तावद् गत्वा सविधमयि कल्याणि! कान्तस्य दूतो
भृङ्गोऽस्मीति भ्रमर! निगदन् मञ्जु सञ्जीवयेथाः ॥"

(पा० २७. श्लो० ४९.)

इति पद्यदिशा भ्रमरं सम्बोधयतो भृङ्गाहन्तामुपदिशतः कवेराकूतं तु सूक्ष्म-विचारमृग्यं दृश्यते । पुरा खलु वनगुल्मलतासान्द्रेषु देशेषु यक्ष्यादिद्युचरी-सञ्चारसमुचितेषु कयापि यक्ष्या श्वेतदुर्गान्मलयशिखरं निनीषितेऽपि, मार्गे निजपतिभीतया परित्यक्ते च नायके तस्य स्वप्रेयसीं बालनीलीं प्रति क्रियमा-णोऽयं सन्देशो नावस्तुसम्भवी ।

"मासप्राप्यं मम दिनयुगेनाभिगम्यं तव स्या-
दस्या धौतं गुणगणसुधावीचिभिः श्वेतदुर्गम् ।
स्थानन्दूराद् दृढमतिरतस्त्वं प्रतिष्ठम्ब तस्मा-
दस्मानुत्तारयितुममुतः सङ्कटादुत्तराशाम् ॥"

(पा० ४. श्लो० १७.)

इति पद्यभागेन तथ्यमिदमुच्यते, यदनन्तशयनाद् बाढं श्वेतदुर्गं मासप्राप्यम्, अधुनेव शीघ्रतरगमनं साधयितुं तत्तादृशवाहनविरहात् । किन्तु भृङ्गस्य दिन-युगगन्तव्यता दिव्यत्वमात्रसाध्या । तच्चेदं दिव्यत्वमादावेव कविरेवमासूत्रयन् मन्ये नासाधुवादी । तथाहि —

"ब्रूमः श्रीमन्! मधुप! भवते स्वागतं वैजयन्त्याः
किं त्वं विष्णोरुरसि विकसद्विभ्रमायाः समायाः।
धम्मिल्लाद् वा परिमलसमासक्तमत्तालिपाली-
केलीलोलद्युतरुकलिकासुन्दरादिन्दिरायाः॥"
(पा० २. श्लो० ६.)

इति।

"सन्देशेऽस्मिन् कथमपि गुरुश्रीपदाम्भोजयुग्म-
ध्यानोद्धूतप्रबलतमसा वासुदेवेन बद्धे।
पूर्णे दोषैरपि यदि गुणानां कणाः सम्प्रथेर-
न्नेतान् प्रीत्या मनसि परिगृह्णन्तु सन्तो महान्तः॥"
(पा० १३)

इति दृश्यमानात् परिसमाप्तिपद्यादस्य सन्देशस्य कर्ता कश्चिद् वासुदेवनामा कविरिति ज्ञायते। यदि पुनरयमेव वासुदेवस्तीर्थाटनकामनया सञ्चरन्ननन्त-शयन आगत्य श्वेतदुर्गवासिन्यै स्वदयितायै सन्देशप्रेषणमिषेण परिचितान् देशानन्यान्यांश्च विशेषान् स्वसुहृदः सहृदः परिचाययन्निदं काव्यं न्यधास्यदहोनुखलु!! सुतरामनेनाजेष्यतात्मानुभवसमर्पणेन साहित्यसमान्दोलिकाया-मिति निश्चयपचम, महाकविरपि कालिदासः कल्पितमेवेतिवृत्तमवलम्ब्य रस-यत्यस्मान् मेघेनेति स एष सामान्यतः समुद्घाटितः पन्थाः प्रहतचर इत्या-स्ताम। इह तु परिचितानेव देशान् परिचितैरेव कार्ये पुरस्कुर्वतोऽस्य साहि-त्यारण्या प्रवेशनं परं स्यात् कश्चिद् विशेष, यदि स्वानुभव एव समुत्कीर्णः। सन्ति च नैके वासुदेवसंज्ञाः कवयः। युधिष्ठिरविजयादेः सुभद्राहरणादेरस्य भृङ्गसन्देशकाव्यस्य च प्रणेतारः। तेषु मन्येऽर्वाचीनः प्रकृतो वासुदेवः, प्राचीनश्च यमककविः। यदयं युधिष्ठिरविजयादिसुभद्राहरणादिकर्तृवासुदेवा-भ्यामर्वाचीनान् श्रीनारायणभट्टपादांस्तत्समयजीविनः श्रीमातृदत्तपण्डितांश्चेह सन्देशे स्मरति। यथा—

"हेरम्बेण प्रथितविभवां मातृदत्तद्विजेन्द्र-
श्रीमच्छब्दप्योत्करमुखरितैरास्तृतां शास्त्रघोषैः।
आराच्चाराचणकविवचःस्यन्दमाधुर्यनन्द-
द्वाणीमन्दस्मितसुरभिलां याहि पाटीरवाटीम्॥

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MADRAS 39.35

सृष्टिं नारायणकविसुखाम्भोजनिष्यन्दमानां
पीत्वा वापीकमलमधुषु प्राप्तनिर्वेदभारः ।
बिम्बे भानोरपरगिरिशृङ्गेण सन्दुम्ब्यमाने
कम्बेथास्त्वं भ्रमर! धरणीं वल्लभक्ष्मोणिबन्धोः ॥"

(पा० १७. श्लो० ९१, ९२.)

इति ।

श्रीमन्नारायणकविरयं नारायणीयादिबहुग्रन्थप्रणेता महाकविर्महापण्डितश्चो-परिनवग्रामवासी श्रीमन्नारायणभट्टपाद एवेत्यत्र गमकमन्यदपि । यदस्य गुरु-वर्यमच्युतपिषारोटिं ज्योतिर्विदग्रेसरमप्ययं ग्रन्थकारः —

"तस्मात् प्रत्यक् प्रहितनयनः कुण्डगेहाधिवासं
सर्वज्ञं तं प्रणम गिरिशं भक्तिमानच्युतं च ।
एकस्तावद् वहति शिरसि ज्योतिषामेकमिन्दुं
ज्योतिश्चक्रं निखिलमपरो धारयत्यन्तरङ्गे ॥"

(पा० १७. श्लो० ८९.)

इति पद्ये परामृशति । अतः सिद्धमस्य जीवितसमयोऽपि क्रैस्तवीयाब्दानां सप्त-दशशतकपूर्वार्धं, यन्नारायणभट्टपादमुनेरच्युतशिष्यस्य । तदात्वविजयिनोऽस्मद-मन्तश्चयनमहाराजान् श्रीवीररविवर्मकुलशेखरान् —

"राज्यं दृष्ट्वाकलय रविवर्मावनीन्द्रस्य सम्पत्-
प्राज्यं वाज्यन्तरितविशिखोदग्रमग्रे समग्रम् ।
चित्रोत्कीर्णं त्रिदशनिवहैः स्थूलनीलोपलौघै-
र्धाम्ना तुल्यं त्रिभुवनपतेर्धाम येन प्रतेने ॥"

(पा० ५. श्लो० २४.)

इति पद्येनानुस्मरन्नयं बाढमात्मनो जीवितसमयं श्रीमन्नारायणभट्टपादीयमनु-मन्यते । कृतिश्चेयं श्रीमन्नारायणभट्टपादैः श्रीगुरुवायुपुरनाथसन्निधौ नारायणीयं स्तोत्रप्रबन्धं भागवतार्थसङ्ग्रहात्मकं विरचय्योपसमर्प्य कल्यतासम्पादनेन भगवत आतङ्कोपशामकत्वेन प्रसिद्धिघोषणानन्तरसम्भवेत्यधस्तनः श्लोको गम-यति । यथा —

"इत्थं नुत्वा भुवनपतिरौ तौ समामन्त्र्य तस्मा-
दस्मत्प्राणप्रियसख! समीरालयं शीलयेथाः ।

यस्मिन् देवः स्वयमपि महापावनः पावनाना-
मातङ्कानामुपशमयिता भासते वासुदेवः ॥"
(पा० १४. श्लो० ७६.)

मार्गे व्याघ्रपुरीक्षेत्रे

[illegible]
[illegible]
[illegible]
[illegible]
(पा० १. श्लो० ५५.)

इति वल्लीमल्लीभ्रमेणोपसृत्य [illegible] नसमाचारे [illegible] चरित्रदर्शनानन्तरं विचारसहचरसमागमे [illegible] कण्ठमुक्तानां [illegible] कथासङ्घटनम् —

	श्लोकम	
रविवर्मनृपः		२४
कूपकक्ष्मापतीनां [illegible]	,,	२५
कोलम्बदेशः	,,	२७
सुललिता नदी	,,	२८
वल्लभग्रामः		२९
दक्षिणविम्बली [illegible]	,,	३०
उदयमार्तण्डः		३२
कौणानदी	,,	३४
श्रीकुमारग्रामः	,,	३६
कुमारालयः		३८
गोदवर्मक्षितीन्द्रः	,,	४२
देवनागपत्तनराजधानी	,,	४५
रविवर्मनृपः	,,	५१
व्याघ्रक्षेत्रम्	,,	६८
पर्णत्रयी		

		श्लोकम्
चूर्णीनदी राजराजक्षितीन्दुः	,,	६१
माटक्ष्माभृत्पुरी	,,	६२
पञ्चरङ्गाधिनाथः	,,	६३
शैलसिन्धुक्ष्माभृत्	,,	६४
कुरुम्बाधिनाथः	,,	६५
गुणका	,,	६६
केरलेन्द्रः	,,	६८
सङ्गमग्रामः कुलीविनीनदी	,,	७०
वृषाद्रिः	,,	७२
समीराल्यः	,,	७६
नेत्रनारायणः	,,	७९
निलानदी	,,	८२
नावाक्षेत्रम्	,,	८६
शैलाब्धिनेतुर्दिव्यस्थानम्	,,	८८
कुण्डगेहम् अच्युतः	,,	८९
विक्रमक्ष्मापतिः	,,	९०
मातृदत्तद्विजः नारायणकविः	,,	९१
वल्लभक्षोणीपतिः	,,	९२

प्रसिद्धीकरणे समुपलब्धो-ऽस्माकमादर्शो ब्रह्मश्री-अघोरमनक्कल् अधिपति-रविवासुदेवर् नम्पूरिप्पाटु-सन्निधानादिति सबहुमानमेतेषु कृतज्ञतामनुस्मरन्नस्मि तमिमं महाजनसमक्ष-मवतारयिता ।

अनन्तशयनम्,
१२-८-१११२.

के. गम्बाशेवशास्त्री.

॥ श्रीः ॥

भृङ्गसन्देशः

वासुदेवविरचितः ।

हर्म्ये रम्ये बहलविगलच्चन्द्रिकायां निशायां
मन्दं नन्दत्कुमुदसुरभौ शीतले वाति वाते ।
लोलापाङ्ग्या मनसिजकलाखेलनायासिताङ्ग्या
साकं निद्रां सुकृतिसुलभां कोऽपि कामी सिषेवे ॥ १ ॥

तं निद्राणं मदनविवशा काचिदालक्ष्य यक्षी
हस्ते धृत्वा मलयशिखरे हन्त रन्तुं प्रयान्ती ।
स्यानन्दूरे निजपतिमुपायान्तमालोक्य भीता
विन्यस्यैनं क्वचन विमनास्तेन सार्धं प्रयाता ॥ २ ॥

पुष्पारामे किल मधुरिपोः सम्भ्रमेण प्रबुद्धः
सद्यः सोऽयं प्रियजनमनालक्षयन् कण्ठलग्नम् ।
कष्टं दिष्टं किमिदमदयं दृष्टमित्याकुलात्मा
तत्र क्षेत्रे कतिचन दिनान्येष मोहेन निन्ये ॥ ३ ॥

मा मा सीद प्रियजनवियोगामयात् कामयाना
यक्षी सौधादपहृतवती प्रस्वपन्तं भवन्तम् ।
कान्ता श्रान्तापि च तव सखे! नापदं प्रापदन्यां
तद् गन्तव्यं द्रुतमिति दिवः शुश्रुवे तेन वाणी ॥ ४ ॥

आकर्ण्यासौ गिरममृतनिःष्यन्दिनीमाधिमन्दो-
ऽप्यन्तर्धैर्याङ्कुरमभिवहन् गन्तुमुद्युक्तचेताः ।
प्राप्तां मूर्च्छद्विरहिमिथुनां माधवीं वीक्ष्य लक्ष्मी-
मार्त्तो भृङ्गं कमपि पुरतो वीक्ष्य मन्दं बभाषे ॥ ५ ॥

ब्रूमः श्रीमन्! मधुप! भवते स्वागतं वैजयन्त्याः
किं त्वं विष्णोरुरसि विकसद्विभ्रमायाः समायाः ।
धम्मिल्लाद्वा परिमलसमासक्तमत्तालिपाली-
केलीलोलद्युतरुकलिकासुन्दरादिन्दिरायाः ॥ ६ ॥

अभ्याशे म तिलकय सखे! कोरकस्तोकनम्रा
सेयं बाला कुरवकलतात्युत्सुका त्वत्सकाशे ।
एता वाताकुलकिसलयश्रेणिभिर्मन्दमन्दं
वीजन्तीव प्रतिनवमधुप्रग्नविन्यो लतास्त्वाम् ॥ ७ ॥

चक्षुर्ग्राह्यं सुचरितफलं वल्लभा कच्चिदेषा
विश्रामं ते पथि वितनुते मञ्जुना गुञ्जितेन ।
या सन्तप्ता दिनकृति ललाटन्तपे सम्प्रविष्टा
पक्षच्छायां तव तदधिकं तप्यते चिन्तयन्ती ॥ ८ ॥

दुर्जातेऽस्मिन् मम करुणया धातुरागोऽसि बन्धु-
र्दिष्ट्या घोरे तमसि पतितस्येव माणिक्यदीपः ।
अभ्यस्तो यश्चिरतरमशोकेषु ते पक्षपातो
भूयानद्य प्रसरतु शशोकेऽपि सोऽयं जनेऽस्मिन् ॥ ९ ॥

कारुण्याब्धे! शृणु मम दशां यौ पुरा विप्रलम्भं
श्रुत्वा काव्येष्वपि ममभुवौ सौम्य! मोहं प्रपन्नौ ।

आवामेवं प्रणयविवशौ दारुणे विप्रयोगे
क्लेशाम्भोधौ विधिरपदयं क्षिप्तवानित्यवेहि ॥ १० ॥

वक्षोमग्नोन्नतकुचभरे कन्दलन्मन्दहासे
गाढाश्लेषे मिलति पुलकेभ्योऽपि यद् द्रुह्यति स्म ।
स्त्रीपुंसं तद् विघटितमिथस्सन्निधानं दधाति
प्राणान् दग्धानिह बहुमुखी कारणं सङ्गमाशा ॥ ११ ॥

लोके जन्तोर्भवति भवितव्यं न चान्यत् प्रयत्नै-
र्दैवाधीनं सकलमिति जानामि नानाविचारैः ।
अप्येवं मे दलति हृदयं दीर्यते धैर्यबन्धः
सीदन्त्यङ्गान्यलिवर! तया हन्त जाते वियोगे ॥ १२ ॥

आकर्ण्यन्ते दिशि दिशि हसच्चूतवल्लीमधूली-
माद्यत्पुंस्कोकिलविगलिताः पञ्चमाः स्निग्धदीर्घाः ।
मन्ये शस्त्रव्रणितहृदयस्येव काकोलमेक-
स्तापोद्रेकं मम बहलयन् प्रादुरासीद् वसन्तः ॥ १३ ॥

खेदानुक्त्वा खलु बहुतरान् विप्रयोगार्ति(सि)न्धा-
वस्मिन् मैत्री भवतु भवता सौम्य! नौ पोतपात्री ।
तद् विश्रम्य क्षणमिह लतामण्डपे सावरोधः
स्निग्धं पीत्वा मधु निलयनं मत्प्रियायाः प्रयायाः ॥ १४ ॥

अस्मत्प्राप्तिं (भु?भव)दनुपदं प्रस्तुवन् प्रागनाथां
गत्वा तप्तामृतजलधौ सौम्य! निर्मज्जयेथाः ।
विश्लेषार्त्या विधुरमनसां वल्लभानामुदन्तः
प्राणान् वीणापरिमृदुगिरां कण्ठनालेऽपि रुन्धे ॥ १५ ॥

लोके ये केचन विदधते पीडितेष्वार्द्रभावं
जन्तुष्वन्तर्न खलु सकला रक्षितुं ते समर्थाः ।
रक्षादक्षा अपि न समये सम्पतन्त्यातुराणां
शिष्टं किञ्चिन्मम सुचरितं सौम्य ! दृष्टोऽधुना त्वम् ॥ १६ ॥

मासप्राप्यं मम दिनयुगेनाभिगम्यं तव स्या-
दस्या धौतं गुणगणसुधावीचिभिः श्वेतदुर्गम् ।
स्थानन्दूराद् दृढमतिरतस्त्वं प्रतिष्ठस्व तस्मा-
दस्मानुत्तारयितुममुतः सङ्कटादुत्तराशाम् ॥ १७ ॥

सम्प्राप्तव्यं तव पुरमितः श्वेतदुर्गं यदुक्तं
तस्यैवालोकनमपि फलं कल्पय त्वत्प्रयाणे ।
यस्मिन् नित्यं हिमगिरिसुताचञ्चलापाङ्गलक्ष्मी-
लक्षीभूतं किमपि करुणाशीतलं ज्योतिरास्ते ॥ १८ ॥

इन्द्रप्रस्थं पुरमिव पुरा कौरवस्य प्रविष्ट-
स्यान्तर्भ्रान्तिस्तव नयनयोः स्याज्जलेषु स्थलेषु ।
वक्त्रैः स्त्रीणां मरतकतले बिम्बितैर्वापिकाम्भ-
श्शुम्भद्बिम्बैरपि च विमलैश्चन्द्रशालाकदम्बैः ॥ १९ ॥

नोद्यानेषु त्रिदशलतिकाः स्थावरास्तावदस्मिन्
पेयं नाब्धेरुदितममृतं नात्र नेता बलारिः ।
तस्मादस्मत्प्रियसहचरीनूत्नदिव्याङ्गनायाः
सृष्टौ धात्रा विरचितमिदं नूतनं नाकमाहुः ॥ २० ॥

वार्तामार्तां प्रति कथयितुं प्रेयसीं मे प्रवृत्तो
मार्गं तावच्छृणु शुभमितस्तन्निकेतावसानम् ।

नीत्वा नीत्वा श्रममनुवनं येन गन्तासि भूयः
पीत्वा पीत्वा मधु सममलिन्या नलिन्यां नलिन्याम् ॥ २१॥

नत्वा देवं नलिननयनं नागभोगे शयानं
कृत्वा सर्वं भव(त?तु) सफलं कृत्यमित्यन्तरङ्गे ।
कुर्युः प्रत्युद्गमसुखमितः प्रस्थितस्योत्तराशां
चञ्चौ चञ्चत्कपिशकलमामञ्जरीकाः शुकास्ते ॥ २२ ॥

दत्त्वा शुम्भत्कनककलशे पद्मनाभालयाग्रे
हृष्टां दृष्टिं सह दयितया सम्पतन्नम्बरान्ते ।
श्यामाश्चञ्चत्किसलयदुकूलाञ्चलाश्चञ्चलीक-
स्तोमापाङ्गा मधुप! लतिका मन्दमामन्त्रयेथाः ॥ २३ ॥

राज्यं दृष्ट्याकलय रविवर्मावनीन्द्रस्य सम्प-
त्प्राज्यं वाज्यन्तरितविशिखोदग्रमग्रे समग्रम् ।
चित्रोत्कीर्णं त्रिदशनिवहैः स्थूलनीलोपलौघै-
र्धाम्ना तुल्यं त्रिभुवनपतेर्धाम येन प्रतेने ॥ २४ ॥

पारेपाथोनिधि कुलपुरी कूपकक्ष्मापतीनां
लक्ष्या लक्ष्मीविहरणकलासम्पदो हेमलक्ष्या ।
फेनक्षौमाम्बरनिचुलितान् यान्निषद्यासु हृद्यान्
वीचीहस्तैर्विकिरति मणीन् नित्यमम्भोधिरेव ॥ २५ ॥

प्रासादेषु प्रियसह[illegible]रीहासमाशङ्क्य हेम-
द्वारं यान्त्यः सपदि वलभौ केशसंस्कारयुक्त्या ।
प्रातर्गात्रं नवनखपदं गूहितुं बालसूर्य-
च्छायारक्तांशुकवलयितास्तत्र दृश्याः सुकेश्यः ॥ २६ ॥

लम्बेथास्त्वं दिवि किमपि [illegible] ! कोलम्बदेशे
रम्ये यस्मिन् विलसति सरो मानसं मानवानाम् ।
नित्यं तद्वै नवरविकरोल्लासिनीं राजहंसै-
र्जुष्टां पट्टाम्बरकनकपङ्केरुहालीं प्रसूते ॥ २७ ॥

स्थास्यत्यग्रे तव [illegible]लांलता निम्नगा दृष्टिपातं
मुग्धं लब्धुं पुर इव पुरा माधवस्य त्रिवक्रा ।
आदायास्या बहुपरिमलं प्राभृतं निर्मलाया
जातामोदः प्रियमिव जनं सौम्य ! सम्भावयेथाः ॥ २८ ॥

कञ्चिद्भागं पुरजनपदाकीर्णमुत्क्रम्य भूमे-
रञ्चत्केरकमुकशिशिरं वल्लभग्राममेत्य ।
लक्ष्मीवक्त्राम्बुजतरुणलोलम्ब ! नित्यं नमस्ते
गोविन्देति प्रणम चरणाम्भोजमूले मुरारेः ॥ २९ ॥

घोराकारं विपिनमतिलङ्घ्याथ तस्यास्तटिन्वा
स्तीरारामे शिशिरसुभगे सौम्य ! विश्रम्य यायाः ।
पात्रीभूता पुनरुदयमार्ताण्डकीर्तिच्छटानां
धात्री नेत्रे सुखयितुमलं दक्षिणा बिम्बली ते ॥ ३० ॥

वन्देथास्त्वं भ्रमर ! पुरतः कञ्चिदाश्चर्यबालं
घोषाद् घोषामन इव मुहुर्गोरसं चोरयन्तम् ।
अस्य ब्रूमः कथमिव पयोलुब्धतां यो विशुद्धां
मुक्तिं दत्त्वा विषकटु पयः पीतवान् पूतनायाः ॥ ३१ ॥

प्रादुःष्यात् ते दृशि कुलपुरी [illegible]पतीनां
कौणीमध्यास्तटपरिसरे दक्षिणे वीक्षणीया ।

या पौरस्त्रीवदनसविधे लज्जमानस्य दौस्थ्यं
दृष्ट्वा मार्ष्टि ध्वजपट-जर्भण्डलं (?) शीतभानोः ॥ ३२ ॥

शीतालुत्वाद् विवृतवदनैरातपे नक्रचक्रै-
स्तीरं घोरं परिहर पुरस्तत्र गौणीतटिन्याः ।
आत्मा रक्ष्यः सकलजगतामापदो दुर्बलाना-
मेतद् द्वारेष्वनभिसरणी नीतिरित्याहुरार्याः ॥ ३३ ॥

ग्रामं पुण्यं द्विजवरगृहप्रोच्चलद्धोमधूम-
श्यामं पश्य प्रियसख! पुनः श्रीकुमाराभिधानम् ।
जातं यत्र क्षितिसुरगणं बालमेवातिहृद्यं
विद्यास्तन्यं सपदि ददती वर्धयत्यद्रिकन्या ॥ ३४ ॥

गम्भीरार्थस्तबकसुभगे सूक्तिदामन्यनास्था
मा भूदेषां भ्रमर! भवतो मद्विधेयत्वराभिः ।
सत्त्वोद्रेकस्फुरितपरमानन्दसंविद्विशेषं
दुग्धे चित्ते रसमधुझरो यस्य सामाजिकानाम् ॥ ३५ ॥

नत्वा गीतैरुपचर कुमारालयं भूषयन्तीं
गौरीं दूरीकृतसुररिपुव्रातदुर्वारगर्वाम् ।
पृथ्वीयातामिव गिरिशकण्ठप्रभामेघलुब्धां
विद्युल्लेखां कचभरमिषादम्बुदैश्चुम्ब्यमानाम् ॥ ३६ ॥

द्रष्टुं ते तां सकृदपि जगन्मातरुत्कण्ठते न-
श्चित्तं लक्ष्मीं परिणयविधौ पूर्वमद्रीन्द्रगेहे ।
सम्मर्दे सत्यमरसदसच्चन्द्रचूडं वरीतुं
मन्दं वान्त्या मयविनयमन्दाक्षरागाकुलाक्ष्याः ॥ ३७ ॥

इत्थं नत्वा गिरिवरसुतां गोदवर्मक्षितीन्दो-
रग्रे सम्भावय पुरवरं प्रस्फुरद्धेमसालम्।
यद् युद्धे(षु) त्रुटितविमतस्तोमकण्ठान्त्रदाम-
प्रच्छन्नाशेष्वसिलतिकया दिद्युते विद्युतेव॥ ३८॥

तत्रारामं व्रज कनकमञ्जीरकैर्मञ्जुवाचां
गच्छन्तीनां मधुरमुखरैस्तारमाहूयमानः।
वापीयातो दरदलितनालीकपालीमधूली-
मापीयातो मधुकर! मृणालान्तराले शयीथाः॥ ३९॥

कृत्वा तासां प्रियसहचरीमेकपक्षान्तराले
तन्वन्नन्यं व्यजनमभिनन्दन् मुदा मन्दवातम्।
स्वादुंकारं मधु दयितया दीयमानं मुखेन
स्वादं स्वादं शमयतु भवानध्वखेदं [illegible]॥ ४०॥

यावद् ग्लानिं विसृजति मनोवल्लभा यावदेव
ग्लानिं भानोर्दधति किरणास्तावदेव क्षमेथाः।
अस्मत्कान्ताव्यसनचकितः सान्त्वयन्नेव भृङ्गीं
मुक्त्वा पद्माकरमथ ततो याहि कारुण्यसिन्धो!॥ ४१॥

अक्ष्णोर्मार्गे निपतति पुरा राजधानी तदानीं
दुर्गाश्लेषादविदितभया देवनारायणस्य।
यो मेदिन्यामपि निजकमर्थापयन् नामधेयं
कीर्त्तिक्षीरार्णवजलमपारं विधायाधिशेते॥ ४२॥

मत्प्रेयस्या मुखविरचने हस्तलेखाय सृष्टा-
नस्यां धाता पु(र?रि) निहितवानिन्दुबिम्बाननेकान्।

अस्य स्त्रीणामिह वदनतां प्राप्य सौधाधिरोहा-
दन्यं मन्ये हिमकरमधः कुर्वते गर्वितास्ते ॥ ४३ ॥

तस्मादन्तर्बकुलपटलीरुद्धघर्मप्रवेशै-
र्देशैरश्वन्नवकमलिनीकञ्चुकैः सञ्चरेथाः ।
कुञ्जे कुञ्जे शबरमुदृशां मन्मथोन्मादितानां
शृण्वन् कुण्ठक्वणितमभिगम्योपगूढो रमण्या ॥ ४४ ॥

दृष्ट्वा नन्दिष्यसि फलभरैरानतां नालिकेर-
श्रेणीं देशावनिषु रविवर्मप्रतापोज्ज्वलासु ।
यां पान्थेभ्यः शिशिरमधुरं वारि दृष्ट्वा ददानां
को(पा)दुन्मूलयितुमुदधिर्वीचिहस्तैर्धुनोति ॥ ४५ ॥

भक्त्या लभ्यः सकलजगतां मुक्तिमार्गप्रदीपः
सच्चिद्ब्रह्मामृतजलनिधेरुत्तरन्नुत्तरङ्गात् ।
अग्रे सेव्यस्तव हरिमणिः कोऽपि कारुण्यशुम्भ-
ल्लक्ष्मीवक्षोरुहकनककुम्भान्तरालैकबन्धुः ॥ ४६ ॥

रत्नादर्शश्रियमुपहरत्यर्कबिम्बे प्रतीची-
वध्वामे + + वमिव किरत्युज्ज्वलं दिङ्मुखेषु ।
द्रक्ष्यस्यग्रे सकुतुकमनिर्वाणरामास्त्रवह्नि-
ज्वालाजालामिव जलनिधौ पिङ्गलां वीचिमालाम्
[॥ ४७ ॥

पूगाटव्या विततकनकस्तम्भयेवातपश्री-
लेपादापाठलितकलिकाजालया नीलयापि ।
गच्छन्नुच्छृङ्खलशुकघटापक्षविक्षोभितानां
जिघ्रन्नङ्गीकुरु परिमलं तच्छिखामञ्जरीणाम् ॥ ४८ ॥

चक्रे पूर्वं विहरणमसौ पुष्पवत्या नलिन्या
वारुण्याशा पुनरमुमधो वर्तयामास भानुम् ।
क्रान्त्वा वेलामिह पतित एवेति खिन्नेव मन्ये
सन्ध्या मङ्क्ष्यत्यलिवर! तदैवाम्बरादम्बुराशौ ॥ ४९ ॥

तापं भूमेस्तरणिजनितं मङ्क्षु संक्षिप्य कोक-
द्वय्याश्चित्ते किरति पवने निर्दयं दाक्षिणात्ये ।
रक्षात्मानं कमलमुकुलाकारकारानिबन्धा-
न्न स्वापायानपि मधुरसादाकुलो वेद लोकः ॥ ५० ॥

व्याघ्रक्षेत्रं भज पशुपतेर्नृत्तरङ्गं दिनान्ते
यस्मै नित्यं रजतगिरिरप्य(भ्य)मूयत्यदभ्रम् ।
प्रादक्षिण्याच्चलति भसितालिप्तगात्रे जनौघे
यस्मिन्नन्यः स्फटिकरचितो जङ्गमो भाति सालः ॥ ५१ ॥

भक्तेष्वत्यादरमखिललोकार्तिहारित्वमग्नः
स्निग्धे लोकेऽपि च विवशतां मानमत्तेषु रौक्ष्यम् ।
मूर्ध्ना कण्ठेन च घनरुचा श्यामभागेन चाक्ष्णा
व्याचक्षाणं प्रणम जगदानन्दनं चन्द्रमौलिम् ॥ ५२ ॥

तस्मिन् सन्ध्याबलिविधिरशेषायनीं भविष्य-
त्यक्षणोरग्रे पटुपटहनिर्ध्वाननिर्धूतलोकः ।
जाहरयन्ते सुमधुरगिरं गायका यत्र नित्यं
झंकुर्वद्भिः कनकवलयैश्चामरग्राहिणीनाम् ॥ ५३ ॥

शम्भोर्बिम्बाधरनिपतितां त्वत्समामञ्जनाभां
दृष्ट्वा रुष्टा यदि गिरिसुता तत्र मा कातरं भूः ।

आलोक्याकस्मिकरुषमिमां सस्मिते तु स्मरारौ
दन्तज्योत्स्ना सपदि विमृजेदत्र(?)शङ्कानिदानम् ॥ ५४ ॥
वाताधूतारुणकिसलयाः पुष्पिता लोलभृङ्गाः
स्तोकोत्कम्पिस्तबकनमितास्तत्र वल्लीमतल्लीः ।
दूरे दृष्ट्वा द्रुतमुपसरन् भृङ्ग! वेत्तासि ताभ्यो
जातैर्गीतैः स्फुटजनपदैर्लासिका इत्युपान्ते ॥ ५५ ॥
गत्वा तस्मिन् विरतिमुपयात्युत्सवद्वारमार्ग-
प्रान्तं शान्तस्त्रिपुरजयिनो रूपमापादचूडम् ।
दृग्भ्यामापास्यसि गिरिसुताकान्तिपूराभिनन्द्यं
कालिन्द्यम्भोमिलितमिव तं नाकसिन्धुप्रवाहम् ॥ ५६ ॥
अश्मारोपे मृदुलमृदुलस्याङ्घ्रिपद्मस्य गौर्याः
सद्यो रक्तस्रुतिरिति नखांशुच्छटां निष्पतन्तीम् ।
आमृज्यालीजनविहसिते तस्थुषो नम्रवक्त्रं
तद्वैलक्ष्यं तव सुखयतां सन्मनो मन्मथारे! ॥ ५७ ॥
आशा वस्त्रे तव बहुतरा पूर्णकामः किल त्वं
पीतं कण्ठे लगति गरलं नीलकण्ठोऽसि लोके ।
श्रीकण्ठं त्वां कथयति जनः कण्ठलग्ना च गौरी
तस्माद् विस्मापकमयि! कथं प्रस्तुमस्त्वां नमस्ते ॥ ५८ ॥
इत्यानम्य त्रिपुरजयिन बाह्यभक्तानकुञ्ज
नीत्वा रात्रिं प्रियजनपरीरम्भजृम्भालयामाम् ।
त्रुट्यत्तारामरणमरु(तो?णो) (या)वदागत्य रक्तां
प्राचीमालिङ्गति दयितया हन्त गन्तुं यतेथाः ॥ ५९ ॥

पूर्णत्रय्यां कमपि कलया पुण्यपूरं स्फुरन्तं
नुत्वा दत्ताञ्जलिरभिमतं भावयित्वा च याहि ।
क्षेत्रे यत्र स्फुरति महिते सूक्तिगङ्गातरङ्ग-
स्तोमैरान्दोलितहरजटाबालचन्द्रः कवीन्द्रः ॥ ६० ॥

पौरस्त्यायां ककुभि परिखीभूतचूर्णीतरङ्गाद्
दूरे दृश्या नभसि नगरी राजराजक्षितीन्दोः ।
यो भीमोऽपि प्रथ(म ? न)समयेष्वर्जुनत्वं यशोभि-
र्नीतः कृष्णामदधत करे खड्गवल्लीं सुभद्राम् ॥ ६१ ॥

माटक्ष्माभृद्वरकुलपुरीं पश्चिमाम्भोधितीरे
दृष्ट्वा निष्टापितकनकसालोपरुद्धान्तरीक्षाम् ।
यत् कैलासे यदपि कलशाम्भोनिधौ यच्च ना(दे ? के)
दृष्टं चित्रं तदिह सहसा विस्मरिष्य(त्य ? स्य)वश्यम् ॥ ६२ ॥

तीरारामैः फलभरनमन्नालिकेराभिरामै-
स्तीर्त्वा देशान् कतिचन पुरग्रामदुर्गानुकीर्णान् ।
प्रत्यासन्नं भ्रमर ! पुरतः पञ्चरङ्गाधिनाथं
नत्वा दूरे परिहर मृधं तत्र भीमान् + + मान् ॥ ६३ ॥

युद्धं तस्मिन् दिनमनुवहद् वर्तते शैलसिन्धु-
क्ष्माभृन्माटक्षितिरमणयोर्विक्रमोच्चण्डदोष्णोः ।
यस्मादस्रोत्करशकलिता बिभ्रती यौधकोटी-
द्यौरुद्विग्ना वरणपटहैरन्वहं रोदितीव ॥ ६४ ॥

अग्रे वल्गत्प्रमथनिकुरुम्बा कुरुम्बाधिनाथा
तत्राद्रेर्विहरति वने ताण्डवैः सान्धिवेलैः ।

मत्ता रक्ताम्भसि करतलं ताडयन्त्यो हसन्त्यो
मग्ना नग्नाः समरधरणौ तत्र दृश्याः पिशाच्यः ॥ ६५ ॥

तां तामृद्धिं जनपदगतां निर्विशन् मार्गदेश-
श्रान्तां कान्तामतिमृदुलया वीजयन् पक्षपाल्या ।
माध्वीं कुञ्जेष्वतिमृदु (वियस ? निपीयानया) गाहितासे
युद्धोद्घुष्टां सपदि गुणकां माटधात्रीन्द्रगुप्ताम् ॥ ६६ ॥

तस्यां स्फोटस्फुटितगुलिकावर्षिदिङ्मण्डलायां
त्वद्गुरुज्वारेतगमने निष्पतत्यम्बरेण ।
त्वामप्येते झटिति गुलिकां त्रापुषीमापतन्तीं
मत्वा लीनाश्चकितमवनौ हास्यतां दर्शयेयुः ॥ ६७ ॥

एकं नत्वा हिमगिरिसुतानेत्रलौहित्यसन्ध्या-
कोकं धाम स्तुतिभिरुपतिष्ठस्व तिष्ठन्नुपान्ते ।
तावन्नन्तुं सविधमयतः केरलेन्द्रस्य राज्ञो
रूपच्छायां पिबसि यदि ते चक्षुषी पूर्णपुण्ये ॥ ६८ ॥

अस्यां दृश्यं न खलु निखिलं नेति साफल्यमक्ष्णो-
र्न स्यान्नेति प्रियसहचरी नोत्सुका नेति चैष्टा (?) ।
कालक्षेपं कमपि न सहे स्मर्यमाणं दुनोति
प्रातश्चन्द्रद्युति (जन)मिमं वक्त्रमस्मत्प्रियायाः ॥ ६९ ॥

पात्रं लक्ष्म्या मधुकर ! ततः सङ्गमग्रामनाम
क्षेत्रं गच्छ प्रचुरदुरितध्वंसि कंसान्तकस्य ।
स्वामिप्रेम्णा कलशजलधेर्वीचिमालेव लग्ना
यस्य प्रस्फोरयति विभवं सा कुलीविन्युपान्ते ॥ ७० ॥

व्यामोद्भिन्नैस्तनुकचभरैर्नर्तयन्तं मयूरान्
भान्त्या वक्षस्यपि दयितया भाययन्तं भुजङ्गान् ।
कुन्दस्वच्छैर्मृदुलहसितैस्तर्पयन्तं चकोरान्
देवं दृष्ट्वा स्तुहि भुवनकल्याणकन्दं मुकुन्दम ॥ ७१ ॥

वेदान्तानां क्षणमनु मरीमृज्यमानं शिरोभिः
पादाम्भोजं शिरसि मम च त्वं कृपाब्धे ! निधेहि ।
यत्संवाहे पुळकपटलीनुन्नहस्तेम्बदेवी
पद्मा रुष्टा पुळकिनि मुहुः स्वे कुमन्निधाति(?) ॥ ७२ ॥

इत्थं गायन्नथ वलयगेहाधिनाथं भजेथा
भक्त्या (ग?न)त्वा कनकनिकषस्निग्धवर्णामपर्णाम ।
(स्थि?स्तु)त्वा चैनामुति?दि)तक(ग?रुणा)पूरपीयूषवृष्ट्या
दृष्ट्या तस्याः स्फुटमनुमतो याहि पुण्यं वृषाद्रिम् ॥७३॥

लङ्काभर्तुर्भुजबलमगेन्मूलितं मान्ध्यनृत्ते
नित्यं शैलं निजमुदकयानोपमानं विभाव्य ।
निर्विण्णोऽस्मादथ विचलितः श्रीप्रियाबुद्धमित्रो
यस्मिन् वासं कलयति सुखेनैव सोमार्धधारी ॥ ७४ ॥

गौरीकान्त ! त्रिनयन ननौवाहने ! त्वं ! देवि !
प्रेमोद्रेको जयति जगतामीशयोरीदृशोऽयम् ।
एवं यो वा खलु कवळयन्नर्धगात्रं विलोने
विश्लेषार्तिप्रदरमविदन्तौ मिलन्तौ भवन्तौ ॥ ७५ ॥

इत्थं नुत्वा भुवनपितरौ तौ समामन्त्र्य तस्मा-
दस्मत्प्राणप्रियसख ! समीरालयं शीलयेथाः ।

यस्मिन् देवः स्वयमपि महापावनं पावनाना-
मातङ्कानामुपशमयिता भासते वासुदेवः ॥ ७६ ॥

लक्ष्मीमन्दस्मितमुररिपुश्रीकटाक्षाञ्चलाख्ये
मुख्ये गङ्गासरितृमुनयोः सङ्गमे मन्मतिः ।
शान्तश्रान्तिर्दिनपरिणतौ देवि ! विलोकी-
नाथं गाधेतरमहिमपाथोधिगाम्भीर्यधैर्यैः ॥ ७७ ॥

वक्त्रेणेन्दोरधरमहसा कौस्तुभस्यामृतस्य
स्निग्धैर्हासैरपि च विभवं मुष्णतीमम्बुराशिः ।
दृष्ट्वा कन्यां किल निजकुलद्वेषिणीं चौर्यशीलां
तुभ्यं कंसान्तक ! दधिपयश्चोर ! दत्त्वा कृतार्थः ॥ ७८ ॥

एवं देवं नुतिभिरभिवन्द्याच्युतं दिग्युदीच्यां
गत्वा दृष्ट्वा कलय निलयं नेत्रनागायणस्य ।
साधुग्रामप्रथितपितृवां शुद्धवर्णानुपक्वां
धत्ते वृत्तिं श्रुतिपरिचितां गीतविद्यामिवासौ ॥ ७९ ॥

प्राग् वन्दस्व प्रियसख ! लतां मुक्तिदेशालवाला-
मुद्गच्छन्तीं पुररिपुकटाक्षालिमालैकभोग्याम् ।
अग्रे (चा)स्या मुहुरवनमन् मल्लिकाः फुल्लानि
प्रत्यग्राणि स्फुटमपचिनोत्युच्चकैर्मज्जुलानि ॥ ८० ॥

भङ्ग्या व्यङ्ग्यान्यधिकपरिमितान् बालपिण्डप्रशब्द-
ब्रह्मोल्लासानुपचितकथानृत्तगीतादिबोधान् ।
नानासूक्तिप्रकरमुखरान् भारतीकल्पवल्ली-
बालोपज्ञानिव सुमनसस्तत्र सम्भावयेथाः ॥ ८१ ॥

मुक्तिस्थानं विमलमनसां तत् सखे! [illegible]
बन्धस्थानं विविधचरितासक्तनानाजनौघः ।
यस्मिन् कालभ्रम उदयते सुभ्रुवां केशहस्तैः
सल्लापैश्च स्मितरुचिभरैर्मञ्जुमञ्जीरघोषैः ॥ ८२ ॥

पुष्पन्यक्चूतप्रकरकलिकासौरभीवासिताशान्
देशानस्मादथ विचलितस्तानये! मानयेथाः ।
अग्रे भाविन्यथ तव निळा लम्बिता सिन्धुवीची-
नीलक्षौमाम्बरपरिसरे हारवल्लीव भूमेः ॥ ८३ ॥

तत्र स्त्रीणां दिवसविरतिस्नानधौताधराणा-
मुत्तीर्णानां जघनपुळिनासक्तसूक्ष्माम्बराणाम् ।
भानुच्छायाप्रणयिनि कुचे बिम्बितात्मा मुहूर्तं
धर्तासि त्वं कनककलशीनीलरत्नोपमानम् ॥ ८४ ॥

कान्तैः साकं पिकमृदुगिरस्तत्र सङ्क्रीडमानाः
पश्यन्त्यस्त्वां पवनचलिते बिम्बितं वीचिजाले ।
छिन्नस्रस्तं मरतकमणीदाम वक्षोरुहादि-
त्युद्भ्राम्यन्त्यः सलिलकुहरं हस्तमावर्तयेयुः ॥ ८५ ॥

क्षेत्रद्वन्द्वं पुरमुरभिदोर्दक्षिणे भाति कूले
नावाक्षेत्रं सुमहितमुदक्कीरदेशे शिलायाः ।
मुक्त्वाम्भोधिं विहरति दयाम्भोनिधिर्यत्र देवो
विष्णुः कोष्णे कुचकलशयोरन्तराले रमायाः ॥ ८६ ॥

तत् पर्याप्तं भवति भवतस्तादृशस्यै(व) देव!
प्रेम्णो यत् त्वं वहसि भगवन्! वक्षसैव प्रियां ते ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE

अर्धं दत्त्वा वपुरलमविश्लेषलोभात् प्रियायै
स्विन्नः शंभुर्मनसि मनुते भाग्यवन्तं भवन्तम् ॥ ८७ ॥

इत्थं गीतं परिमृदु विधाया(ऽङ्घ्रि)पङ्केरुहाभ्यां
नत्वा रूपं नवजलधरश्यामयन्तं निधाय
तस्योपान्तादथ विचलितः पश्य शालाद्यनभ्रु-
र्दिव्यस्थानं प्रचुरतनुभृच्चक्षुषां कौतुकाय ॥ ८८ ॥

तस्मात् प्रत्यक् प्रहितनयनः कृष्णदंष्ट्रार्धिबाहुं
सर्वज्ञं तं प्रणम गिरिशं भक्तिमानभ्युपेत्य च
एकस्तावद् वहति शिरसि ज्योतिषामर्कमिन्दुं
ज्योतिश्चक्रं निखिलमपरा धारयन्त्यन्तरङ्गे ॥ ८९ ॥

यस्मिन् विस्मापकमृजुबलप्रक्रमा विक्रमन्ते मा-
वन्तः सिद्धप्रभृतिमहिमप्रक्रियाक्रान्तलोकाः ।
नानादेशोद्धतिमनुभवा(ऽनु)वृन्दमानन्दयन्ति
श्लाघो माघोत्सवमपि + + निपुणे दृष्टवन्तम्

हेरम्बेण प्रथितविभवां मातृदत्तद्विजेन्द्र-
श्रीमच्छिल्पोच्चकरमुखरितैराप्तृता शास्त्रयाणैः
आरान्नारायणकविवचःस्यन्दमाधुर्यमन्द-
द्राणीमन्दस्मितमुरभिता यातु ते वीथिवाटीम् ॥ ९१ ॥

सूक्तिं नारायणकविमुखाम्भोजनिष्यन्दशीतां
पीत्वा वापीकमलमधुषु प्रातरिर्वैः सभारं
बिम्बं भानोरपरगिरिशृङ्गेण मज्ज्यमानं
लम्बेथास्त्वं भ्रमर! भरणौ वल्लभक्षोणिबन्धोः ॥ ९२ ॥

तत्र श्यामाचिकुरसदृशे मूर्च्छति ध्वान्तपुञ्जे
देशस्नेतायजनविसरद्धोमधूमाभिरामः ।
द्रागुल्लङ्घ्यो धरणिमरुतामालयः सेव्यसेवा-
लोपो लोके न वरमपराधाय का(ल?लाति)पाते ॥ ९३ ।

प्रत्युद्यस्यन्त्यलिवर! ततः श्रान्तकान्तं भवन्तं
संवीजन्तस्तरुकिसलयैः स्निग्धमाध्वीजलार्द्रैः ।
भृङ्गीमञ्जुक्वणितविभवोन्निद्रभद्रानुयोगा
सत्प्रेयस्या मुखपरिमलासारचोराः समीराः ॥ ९४ ॥

व्यक्तं विज्ञास्यसि जनमनोलोभनीयैर्विशेषै-
रग्रे शुम्भन्मणिगणमहःस्यूतमस्या निवासम् ।
लीनामन्तर्मम सहचरीं निर्विशन्निर्विशङ्कं
सायं सोऽयं भवति सुकृती मीलिताक्षो यथाक्षैः ॥ ९५

इति भृङ्गसन्देशे पूर्वभागः ।

अथ उत्तरभागः ।

मञ्जुध्वानं सललितपुरन्ध्रीजनारब्धगीता
माध्वीलोलं नवमधुझरीलोललोलम्बजाला
कान्तासक्तं सुदृढदयितारागमूर्छालपौरा
नैस्तैर्भावैर्मदयितुमलं त्वाममौ राजधानी ॥ १ ॥

जातभोगा भवननिवहैस्तुङ्गशालैर्विशालैः
सौधोत्सेधैरपि विलसिता पूर्णभोगैर्नभोगैः ।
रम्यारामा पुनरनुगृहं रम्यरामा च यासौ
चित्रं धत्ते बहुविधमहो नैकमालेख्यरूपम् ॥ २ ॥

रुचं रागो नहि मणिरुचा केवलं (ना?सोऽ)ङ्गनानां
[illegible]धिमतवनितासंगमेनापि यूनाम् ।

श्यामा वल्ल्यो न खलु कुसुमैः केवलं भान्ति यस्यां
नो वा नन्दत्कुमुदपवनैः किन्तु मुग्धैर्विलासैः ॥ ३ ॥

यत्सौधाग्रे कुवलयदृशां मूर्च्छनाशालि गीतं
श्रुत्वा मूर्च्छामिव गतवतां कौतुकस्तम्भितानाम् ।
गन्धर्वाणामनुगतनिजप्रेयसीरोषदत्त-
क्रीडापद्मप्रहरणमहो जायते बोधनाय ॥ ४ ॥

तत्र स्त्रीणां कुटिलचटुलभ्रूलतालोकनेन
त्रस्ते हस्ताद् द्रुतमपहृते कार्मुके मीनकेतोः ।
उद्भ्राम्यन्ती मधुकरमयी शिञ्जिनी रोमराजि-
व्याजादासां विरतविरुता रोमवल्ल्यां निलिल्ये ॥ ५ ॥

तुङ्गे हर्म्ये परभृतगिरां नृत्तलीलोत्सुकानां
मञ्जीरोत्थं यदपि रणितं यच्च तस्योपकण्ठे ।
गङ्गाहंसीकुलविरणितं ते मिथः शीलयेते
शिक्षायोगादिव नवनवान् यत्र माधुर्यभेदान् ॥ ६ ॥

यस्यामन्तर्मणिनिलयने वल्लभैर्नीविबन्धे
संसृष्टानां नवपरिणयव्रीडितानां वधूनाम् ।
लीलाम्भोजप्रहृतिभिरनिर्वापिते रत्नदीपे
ध्वान्तोद्वारी सपदि विगलत्कुन्तलो बन्धुरासीत् ॥ ७ ॥

यत्प्रासादाः शिखरविहरत्कामिनीवक्त्रदत्त-
व्रीडादीनं निजपरिसरे सञ्चरन्तं मृगाङ्कम् ।
आवृण्वन्ति स्फुटहरिमणिच्छायनीलांशुकाद्यै-
स्तुङ्गात्मानः किमु न जलरूपेषु कामुण्यवन्तः ॥ ८ ॥

यस्यामच्छस्फटिकमणिसम्भिन्नवैडूर्यरोचि-
र्वीचीभङ्गप्रसरतरले राजमार्गान्तराले ।
गच्छन्तीनां कुवलयदृशां वीक्ष्य वक्त्राणि दूरे
हंसा हेमाम्बुजवनधिया संकणन्तो वलन्ते ॥ ९ ॥

यस्यां नारायणमुपगतं कृष्णगोविन्दनाम्ना
दृष्ट्या सौधाभिधकलशसिन्धूर्मिभिः सेव्यमानम् ।
मालव्याजाद् वलयितवपुः सेवते गोपुराख्या
विख्यातोद्यन्मणिधरफणामण्डलः कुण्डलीन्द्रः ॥ १० ॥

तस्य ब्रूमो नहि गुणगणं कृष्णगोविन्दनाम्नो
दानं (वीर्यं) वपुरतिशयं यस्य ते वर्णयन्ति ।
सूरीन्द्राणां कनकभरिता वैरिणा सर्वशून्या
वामाक्षीणामपि च निलया भूरशीतोपचाराः ॥ ११ ॥

तस्यां पुर्यां भज पशुपतेस्ताण्डवं मन्द्रतारै-
र्गीतैस्तन्वन्निव गिरिसुतायानताभ्रप्रदानम् ।
सत्वा चैनं मधुकर! ततो निर्गतो वीक्षितासे
तं तत्र स्फटिकमरकीमुत्तरां प्रियायाः ॥ १२ ॥

लक्ष्मीनेत्राञ्चलमधुकरोद्यानमुद्द्योतमानं
यत्रोद्यान्ते भवति भवनं ललयक्षाभिधानम् ।
यस्मिन् विश्वोत्तरगुणगणं चात्तनालीति संज्ञा-
मध्यारूढं मदभिलषितं कामिनीरत्नमास्ते ॥ १३ ॥

यत्सौन्दर्यं सकलजगतां नेत्रपीयूषजुष्टं
यत्तारुण्यं कुसुमधनुषो जैत्रमक्षय्यमस्त्रम् ।

यत्सौजन्यं बुधजनमनोहारि यद् भूरिसारा
विद्वन्निष्ठा जयति विमला सृष्टिरम्भोजयोनेः । १४ ॥

वेणीभारे परिमलमयी कन्दलद्रागतोषे
गाढाश्लेषे रतिरसमयी रङ्गभूमिः स्मरस्य ।
लीलालापे मधुरसमयी मन्मथायोधनान्त-
श्रान्तौ नव्यामृतरसमयी सा मम प्राणनाथा ॥ १५ ॥

बालोद्याने कुसुमसुरभौ तत्र कङ्केलिपोतः
सम्भाव्यस्ते दधरसखैरुल्लसत्पल्लवौघैः ।
किञ्चिद्रो वा स्खलितसमये मञ्जुमञ्जीरनादां
तस्याः पादाहतिमनुभवन् माननीयो मयापि ॥ १६ ॥

वापी कापि स्फुरति पुरतः सा वयस्याभिरस्या-
स्तापश्रान्त्यै नियतमधुना लूनभूयिष्ठपद्मा ।
व्याचष्टे या झटिति तटमारुह्य कल्लोलघोषैः
स्नाने स्नाने स्तनजघनयोर्गौरवं मत्प्रियायाः ॥ १७ ॥

तस्यास्तीरे कुरबकतरुः प्रेक्षणीयः सखे! ते
यो मे पूर्वं कुचकलशयोः संविभागी रमण्याः ।
हन्तेदानीमुरसिजभरास्पारकैः(?) स्वर्णकुम्भै-
रासिक्तोऽसौ चलितमधुकृज्जादतो रोदितीव ॥ १८ ॥

तत्रालक्ष्यौ मधुप! मधुरौ मालतीचूतपोतौ
तौ तत्तादृक्प्रणयसुभगौ + + + + + + + ।
+ + + + + + + + + + + + सा खल्विदानीं
मन्ये सञ्चिन्ततनिजदशाविह्वला मुह्यतीति ॥ १९ ।

उद्यानानि स्फटिकगिरयो मालतीमण्डपा(श्च)
प्रत्यग्राणि स्मररसगृहाण्यम्बुधारागृहाणि ।
जिह्वामेभ्यः शिव शिव नियच्छामि पश्येत् प्रविष्टो
यद्येकैकं न खलु (स) पुनः स्वर्गसि(न्धुर्दैर्यते ? द्यै
[यतेत) ॥ २० ॥

तत्रोपान्ते मधुप ! कनकद्वारमार्गोपकण्ठे
मार्गश्रान्तिं शमयतु भवान् क्वापि वल्लीनिकुञ्जे ।
तावद् द्रष्टा शिशिरविधिषु व्यापृताः सौधदेशं
यान्तीर्यानत्वरणविरणन्नूपुरास्तद्वयस्याः ॥ २१ ॥

गूढं तासां (कु ? क)चभरमुपालम्ब्य यातो मदीयान्
प्राणान् वीणामधुरनिनदान् भ्रातरालोकयेथाः ।
श्यामग्राह्याञ्जघनपुलिने मध्यदेशे मनोज्ञे
मुष्टिग्राह्यानुरसिजभरे हेमशैलोपमेयान् ॥ २२ ॥

मा कल्याणी मम सहचरी सौम्य ! विज्ञापयिष्य-
त्यात्मानं ते मुहुरभिनवैरेव शोभाविशेषैः ।
सौधे विद्युद्वलयसुषमां बिभ्रतीनां वधूनां
मध्ये वल्लीततिषु विलसन्तीव सन्तानवल्ली ॥ २३ ॥

यः प्रत्यङ्गं मदनसमरे हन्त सञ्चुम्ब्य तृप्तिं
तत्रैकस्मिन्नपि न गतवान् प्रेमपर्याकुलोऽहम ।
भङ्गान्येतान्यमृतशिशिराण्यद्य मद्वल्लभाया
मुक्त्वा दूरे पुनरपि च किं पुण्यहीनो वदामि ॥ २४ ॥

लीलालापो बहलकचबन्धोऽपि बन्धू कुद्रूनां
बिम्बोकश्रीरपि पदतलं क्षोभणं पल्लवानाम् ।

ऊरुद्वन्द्वं वपुरपि घृणां लम्भयत्येव रम्भां
चित्रं नेत्रं जयति जलजं कण्ठनालोऽपि तस्याः ॥ २५ ॥

यक्त्रं तत्तादृशमतिमनोहारि नैवोपमाभि-
र्न्यूनीकुर्वे शशिकनकपङ्केरुहाद्याभिरद्य ।
चक्षुष्मन्तो न खलु विवदन्ते जनाः किं बहूक्तै-
स्तस्याः सृष्टौ परिणतमभूत् स्वर्गशिल्पं विधातुः ॥ २६ ॥

ये नारीणां स्वयमभिनवा भूषयन्त्यङ्गमङ्गं
ये वा यूनां स्वयमुपदिशन्त्याकुलान् भावभेदान् ।
ये खेलन्ति प्रथमवयसः प्रौढ(मा ? ता)याश्च मध्ये
तानध्यास्ते मधुकर ! वयोविभ्रमानुत्पलाक्षी ॥ २७ ॥

(ये ? ए)नां म्लानामधिकमधुना कल्प(ये) विप्रयोग-
व्यालक्ष्येलोद्गतिभिरयथापूर्वशोभाङ्गलेखाम ।
राहुक्षोभादिव शरदिजां कौमुदीं दाववह्नि-
ज्वालादाहादिव च मधुमासोज्ज्वलां बालवल्लीम ॥ २८ ॥

अङ्के तस्याः सुमृदु विनिधायावशं पूर्वकायं
क्लान्तौ पादावपि जघनबिम्बेन तल्पे निलीनाम् ।
बालां बाष्पस्नपितवदनां घर्मशय्यां प्रपन्नां
मन्ये तस्मिन् भ्रमर ! समये पीडया मीलिताक्षीम् ॥ २९ ॥

आकृष्टो यः सपदि वदनाच्चुम्बने पाणिना मे
कीर्णः क्रीडाविरतिषु धृतो यः प्रकोपावधाने ।
येनानन्दस्मितमिव रतौ पुष्पजालं विकीर्णं
सोऽयं नूनं भुवि लुठति हा धूसरः केशपाशः ॥ ३० ॥

पूर्वं सौधाद् गुरुपरिसरं प्रस्थितायामकाण्डे
यौ दृष्ट्वामार्जयमविनयाशङ्क्ययाहं कराभ्याम् ।
अन्तर्लग्नं स्फुटतरमविज्ञाय ताम्बूलमेतौ
धूम्रादर्शाविव विधिवशादद्य जातौ कपोलौ ॥ ३१ ॥

रुष्टो दन्तक्षतिभिरिव यो रक्ततामेति भूयो
यः प्रत्यूषेष्वनुभवति वा हस्तसञ्छादनानि ।
अद्य श्वासैस्तरलितकुचाम्भोजकुम्भैरशीतैः
सोऽयं ताम्राधरकिसलयो दूयते पेलवाङ्ग्याः ॥ ३२ ॥

एषा नित्यं बिसवलयमक्लेति रोषादिवाम्या
मन्दं मन्दं कनकवलयैः प्रस्थितं बाहुवल्ल्याः ।
पाणिस्पर्शात्सवमलमभाना मदीयं नितम्बा-
त्मन्ये खिन्नो विग(लित?लति) शनैर्नीविब(न्धै?न्धः)
[प्रियायाः ॥ ३३ ॥

निश्चिन्वानो मम सहचरीं लक्षणैरित्युपान्ते
पश्यन् गूढं क्षपय समयं किञ्चिदाश्वासहेतोः ।
वीजन्तीनां वलयरणिताशङ्क्या मन्दमन्दं
मध्ये बाला यदि सवयसां लोचने मीलये(ते?त) ॥ ३४ ॥

काले तस्मिन् मम सहचरी जालमार्गैः सखीभि-
स्तापश्रान्त्यै शिशिरमनिलं सेवितुं शायिता वा ।
(हा) हा सख्यो मम वपुरिदं दह्यते चूतवाटी-
वातैरेतैरिति विलुठिता सास्रमु(त्वाव?त्क्वा ग)ता वा ॥

मध्ये मध्ये तुहिनजलसिक्तेऽपि हस्ते सखीनां
म्लानाम्भोरुहसमदशो दृष्टमारापदाना ।

निद्रां याता किमपि बिसिनीसंस्तरे संप्रबुद्धा
सद्यो हा हेत्युदितरुदिता ताभिरालम्बिता वा ॥ ३६ ॥

हा हा मार! स्मर! तव कृपासम्पदेकावलम्बा
जातिः स्त्रीणामसुलभजनप्रार्थनादुःखशीला ।
स त्वेनां मां मुहुरपि कथं लज्जसे न प्रहर्तुं
चित्ते लोकत्रितयविजयश्लाघिभिः सायकौघैः ॥ ३७ ॥

स्वामिन्! मन्दानिल! किमिदमारभ्यते हन्त दग्धुं
[illegible]विषशिखिशिखादग्धशेषं मदङ्गम् ।
एषा याच्ञा मम हि चरमा मन्दमादाय भस्म-
क्षोदामेलान् दयितमिलिते दिङ्मुखे पातयेथाः ॥ ३८ ॥

निद्रे! देवि! प्रबलमदनातङ्किनी कण्ठलग्न-
प्राणा काचित् तव करुणया बालिका पालनीया ।
तद्वक्त्रेन्दुं सकृदपि समाघ्रातुमस्यै दिशेति
व्युत्थैर्व्या सपदि रुदती रोदयन्ती सखीर्वा ॥ ३९ ॥

दास्येऽहं ते पुनरिति च यो याचने तर्जयन्त्यां
वार्त्तां दास्ये किमु न भवती नित्यमित्यालपन्तीम् ।
दृष्ट्वा शारीं हसितमुदितं वीक्ष्य सख्या चिरेण
स्मेरं दृष्टं तव वदनमित्येवमालिङ्गिता वा ॥ ४० ॥

कृत्वा कर्णोत्पलदलपुटे दुर्दशान्धा नखाग्रै-
र्दत्त्वा सख्यै किमपि करुणं कर्णमूले लपन्ती ।
ध्यात्वा हन्त क्षणमिव स किं नागतः श्रावितोऽपि
क्लेशान् दग्धैरसुभिरलमित्युत्थिता वा निरुद्धा ॥ ४१ ॥

अङ्के पङ्केरुहनवदलैरास्तृते केलिसख्या
गाढोत्कण्ठामृदितमृदितैरङ्गकैरावलन्ती ।
बाले! मा मा रुदिहि दयितस्ते समायास्यति द्राग्
निद्रां तावद् भज निभृतमित्येवमाश्वासिता वा ॥ ४२ ॥

रक्ष्याहं ते यदि सखि! वदाम्यत्युपायं मयि द्राग्
निद्राणायां व्रजति सविधं वल्लभो मन्दमन्दम् ।
मल्लीदाम्ना तमिह निबधान क्षणं सम्प्रबुद्धा
दोर्भ्यां बध्नाम्यहमिति निपत्यालपन्ती सखीं वा ॥ ४३ ॥

प्रत्यक्षं मे सुभग! पतितो यावदस्मिन् मुहूर्ते
चित्तन्यस्तं त्वयि त(द)धुना दीयतां दीनबन्धो! ।
शाठ्यं सोढुं सकलमिह ते नालभस्मीति बाला
पादानम्रे मयि निगदितं विह्वलं प्रस्तुतं वा ॥ ४४ ॥

मुग्धा पादप्रणमनमनादृत्य तिर्यङ्मुखी वा
मय्यारक्ता कुतुकतरलानर्पयन्ती कटाक्षान् ।
अन्तर्हासाङ्कुरविकसिताताम्रगण्डं मुखेन्दुं
बाष्पोत्पीडव्यपनयमिषाद् गूहमाना कराभ्याम् ॥ ४५ ॥

प्राप्ता मोहं निभृतमथवा स्विन्नसर्वाङ्गयष्टि-
र्मध्ये रोमाञ्चितकुचभरा दीर्घमन्तः श्वसन्ती ।
इत्थंभूता कथमिव विधे! नानुकम्प्या सखी नो
दग्धोऽसीति स्खलितवचसां मध्यलग्ना सखीनाम् ॥ ४६ ॥

हा हा कष्टं सहचरि! जगन्नेत्रपीयूषवीची-
माले! बाले! कथमिव दशामीदृशीमागतासि ।

नेत्राम्भोजं स्तिमितमिदमुन्मूलयत्यालिवर्गे
सिञ्चत्यङ्गं तुहिनपयसा बोधमासेदुषी वा ॥ ४७ ॥

एवं गाढं व्यसनपतितां वीक्ष्य यावत् कृपार्द्रो
वेधा (बो? बा)धां परिलघयितुं प्रक्रमेत क्रमेण ।
प्रस्पन्देत भ्रमर! सु+षा तावदेवाशु वामा
दृष्टिस्तुष्टिं त्वदुपगमजां सूचयन्तीव तस्याः ॥ ४८ ॥

तेनाश्वस्ता किमपि कुतुकाश्चर्यलज्जानुविद्धा
मुग्धा संमार्जयति नयने यावदस्राम्बुपूर्णे ।
तावद् गत्वा सविधमयि कल्याणि! कान्तस्य दूतो
भृङ्गोऽस्मीति भ्रमर! निगदन् मञ्जु सञ्जीवयेथाः ॥ ४९ ॥

स्यानन्दूरे मधुरिपुपुरे वर्तते वल्लभस्ते
मुक्त्वा युष्मद्विरहमपरो नैव तस्यामयोऽस्ति ।
मुग्धापाङ्गि! त्वदभिसरणायोद्यतेनामुनाहं
मुक्तः पूर्वं समुपगतवानस्मि सन्देशहारी ॥ ५० ॥

यूनस्तस्य स्मरहुतवहक्षोभदुःस्थावस्थां
ब्रूमो मुग्धे! कथमिव वयं स्वल्पविज्ञानसाराः ।
एतावद्वै सुमुखि! कथये वीक्ष्य तामद्य सद्यः
शीतो वह्निर्भवति विततिः स्यन्दते चोपलानाम् ॥ ५१ ॥

चण्डि! त्वत्साहसमनिशमाशङ्कमानः स्मरात्स्यां
हर्तुं प्राणानपि हतविधावुद्यते खिद्यतेऽसौ ।
मीलद्बालक्रमुककहळीकोमळं ते शरीरं
घोरं मारायुधैमपि हृदा मिश्रयन्नश्रुवर्षी ॥ ५२ ॥

इत्याकर्ण्य ज्वलितमदनोन्मादमूढापि वाणी-
मेनामञ्चत्पुलकनिकरा स्विन्नहस्ताङ्गुलीका ।
तुभ्यं मञ्जु स्मरसुरभिलान् सादरान् सानुयोगान्
बाला दास्यत्यलसवलितभ्रूतरङ्गानपाङ्गान् ॥ ५३ ॥

इत्थं तस्यै कथय सुदति! त्वां प्रियो मन्मुखेन
व्यक्तं ब्रूते नवमनुभवन्नीदृशं विप्रयोगम् ।
पादाम्भोजं तव सुवदने! चूडितुं प्रस्थितोऽहं
तावन्मा मा तनु तनुलतां दीपिने तापवह्नौ ॥ ५४ ॥

उ(क्तां) पद्मस्तबकसुभगामद्य सन्देशवाणी-
मस्मद्दत्तां स्रजमिव नवां स्वीकुरु प्राणनाथे! ।
(तां ल)ब्ध्वा च प्रणयिनि! पुनः सम्प्रतीक्षस्व कालं
तत्तत्क्रीडातरलमनसा सार्धमालीजनेन ॥ ५५ ॥

अप्रत्यक्षा शशिमुखि! दृशोर्मे यदासीस्तदैव
प्रत्यक्षाभून्मम सुचरितन्यूनता किं वदामि ।
त्वद्भ्रूलक्ष्म धनुषि हसिते मय्युपाबद्धवैरो
मारश्चित्तं मम वितनुते बाणलक्षस्य लक्षम् ॥ ५६ ॥

त्वद्विश्लेषव्यसनविधुरं चित्तमत्यन्तखिन्नं
तन्वन्नर्थग्रहणनिपुणं मन्दयन्निन्द्रियाणाम् ।
चण्डीभर्तुर्निटिलदहनज्वालिकाबालमित्री-
भूतः प्राणेश्वरि! (द)हति मां कोऽपि तीव्रो विकारः ॥ ५७ ॥

अङ्गेष्वेकं तव सुललितेष्वन्तरीक्षे यदाहं
त(त्त)स्याग्रे खलु तदितराण्यङ्गकान्युल्लसन्ति ।

लीलामेकामपि करयितुं चेतसा सम्प्रवृत्ते
तारा लीलास्तव तदितरास्तत्पुरः प्रस्फुरन्ति ॥५८॥

सङ्कल्पेन्दं समुदयति यत्सङ्गमानन्ददायि-
(इ?न्द)न्त [illegible] मि म मा हन्त मूर्छावतारः ।
सूचीभेद्यैरिव तिमिरकैः पौरपर्यन्तरात्रं
श्रेयो मुग्धप्रकृतिहरणैः प्रेयसे मद्धृदे ॥५९॥

वातैर्मन्दप्रसरदलकैः कुन्दपुष्पविकासै-
र्लोकारब्धप्रमदसुरतारम्भसंभावनाभिः ।
उद्यद्धूमं मलयजरसस्निग्धसान्द्रोष्मलाक्ष्यः
प्रत्यूषे मन्दिरपरिसरा[illegible]दिशो वासयन्ते ॥६०॥

उद्यद्घोणां श्रमसलिलसंपृक्तकस्तूरिकाभि-
र्दोलायन्ते नवमदलतीसौरभीप्राप्तलाशाः ।
मन्दं मन्दं मलयशिखरादुच्चलन्तो मरुन्तः
सन्ध्यावातप्रिरचपतयस्तन्वते ते लीलाम् ॥६१॥

कूले कूले मुखरकलहंसाकुले व्यापकानां
मूले मूले पृथुलकलिकाभासमन्नतानां लतानाम् ।
यूथे यूथे वलिनतरलालोकिनीनां मृगीणां
स्मारं स्मारं तव सुमदृशः विभ्रमा(स?नु)द्भ्रमामि ॥६२॥

दृष्ट्वा वक्त्रं तव मुलठितं प्राग्निशावृत्तसुकं मां
सद्यः शंसत्युडुपतिरयं दव इत्येणपोतः ।
दृष्ट्वा वाष्पां मुखमुपगतं मां मदालेप हंसः
स्मेरं हेमाम्बुजमिति तवेति वक्तुं न कोऽपि ॥६३॥

तीव्रोत्कण्ठादहनभरिते रुष्टमाराहिजुष्टे
मोहग्राहे हृतहृदयसन्तापकाकोळपूर्णे ।
विश्लेषाब्धौ सुमुखि! विधिना पातितः सङ्गमाशा-
पोतालम्बी तव सहचरः प्राणिति प्राणनाथे! ॥ ६४ ॥

कालव्यालं कनकवलयं भोजनं काळकूटं
वासः कृत्तिं रुचिरघुसृणस्था(य? स)कं वीतिहोत्रम् ।
रत्नादर्शं तपनमनिशं कल्पयन्नस्मि शम्भुः
सोऽयं मारं समदहदहं तेन दह्ये किमेतत् ॥ ६५ ॥

पुष्पारामे मृदु मृदु रणन्नूपुरं तत् प्रयाणं
विश्लेषान्ते निबिडपुलकालङ्कृतामङ्कपालीम् ।
काञ्चीदाम्ना तदपि भुजयोर्बन्धनं प्रेमकोपे-
ष्वद्य स्मर्तुर्मम दलति हा चित्तमम्भोरुहाक्षि! ॥ ६६ ॥

बाले! किं न स्मरसि तदिदं यत् प्रसूनापचाये
दृष्ट्वा चूतं कमपि मिलितं मालतीभ्यामुभाभ्याम् ।
मोहाद् धन्यस्तरुरयमिति प्रस्तुतार्थो मुखेन्दौ
रभ्यद्गण्डे तव विवशधीरानतोऽहं पदाभ्याम् ॥ ६७ ॥

कच्चिद् बाले! हृदि तदधुना भाति मध्ये सखीनां
क्रीडन्तीनां विहितसमयौ गूढभावां प्रयातौ ।
मल्लीकुञ्जे कृतविहरणौ तास्वनुप्रस्थितासु
क्रीडावाप्यामथ पुनरमज्जाव लज्जावनम्रौ ॥ ६८ ॥

स्मर्तव्यं तन्मधुरमुखि! यत् कन्दुकक्रीडितेषु
व्यासक्तायां त्वयि तमहरं पाणिपद्मादहं ते ।

याता रोषादिव सवयसां मध्यतो मन्दिरान्त-
र्मामालिङ्ग्य स्फुरितमदिथास्तत्र ताम्राधरं मे ॥ ६९ ॥
अन्यच्चापि स्मर मणिगिरौ मालतीकुञ्जमालि-
न्यावां पूर्वं कुसुममपचेतुं गतावभ्युपेतौ ।
दृष्ट्वा सख्या जयति युवयोरेष पुष्पावचाय-
क्लेशो भूयानिति वि(क ? ह)सिते कोपलज्जाकुलोऽभूः
[॥ ७० ॥
रत्नादर्शे सरसि विविधं क्रीडतोर्नौ सखीभि-
र्मग्नोऽहं त्वामवशतरधीराललम्बे नितम्बे ।
स्विद्यद्गण्डा शशिमुखि ! दृशं पातयामासिथ त्वं
वक्त्रे तासां सभयविनयानन्दमन्दाक्षकोपाम् ॥ ७१ ॥
अथैतन्मां दहति (य ? द)यिते ! चिन्त्यमानं पुरा यद्
दृष्ट्वा सन्ताडयितुमरविन्देन मामुद्यतोऽभूः ।
तद्रेणुं मे नयनपतितं कल्पयन्तीव मोहा-
दुद्यद्बाष्पा सपदि कलहं विस्मृता मत्प्रगूढा ॥ ७२ ॥
तद् वृत्तं ते धृतिमपहरत्यस्मदीयां प्रहासे
गच्छामीति स्थिरमतिरुपामन्त्रयं त्वामहेतोः ।
सद्यश्शय्या(भु)विनिपतिता सन्नगात्री मया त्वं
भूयो भूयस्तदनु रुदता गाढमालिङ्गिताभूः ॥ ७३ ॥
अ(न्य)त्रास्मत्प्रणयचरितं सन्दिशामि प्रिये ! ते
चौर्यं जातं रहसि तदिदं पूर्वमम्भोरुहाक्षि ! ।
तस्मिन् वासोविनिमयमविज्ञाय पार्श्वं गुरूणा-
मा(लां ? वां) प्राप्तौ तदपि विदितं नैव दैवानुकूल्यात् ॥ ७४ ॥

उक्तैरेवं कुवलयपलाशाक्षि ! विस्रम्भचिह्नै-
रन्यैश्चास्मत्कुशलमवधार्य प्रसन्नैव भूयः ।
मूर्च्छामोहेष्वनिमिषमुपचत्सु दत्ता मयासौ
सूक्तिर्मुक्तास्रगिव शिशिरा धार्यतां कण्ठनाले ॥ ७५ ॥

मा विश्लिष्टो मम रमण इत्येकदापि स्मर त्वं
मुग्धे ! सोऽहं तव पतित एवान्तरे बाहुवल्ल्याः ।
तावत्कालं क्षपय दधती स्नानपानाशनादि-
व्यङ्गीकारं शशिमुखि ! सखीवर्गनानाविनोदैः ॥ ७६ ॥

निर्भङ्गाढः सुचिरमचिरात् सङ्गमानन्दपीयू-
षाब्धौ यावद्विरहशिखिनस्ताप एति प्रशान्तिम् ।
सौधेष्वद्यप्रभृति मुदितौ पुष्पशय्याञ्चितेषु
क्रीडिष्यावो बहलविगलच्चन्द्रिकासु क्षपासु ॥ ७७ ॥

ये ये चक्रीकृतकुसुमचापेन कामेन भूयो
निर्दिष्टाः स्युः प्रणयजलधौ ये च ये च स्फुरन्ति ।
ये सङ्कल्पैरिह बहुमुखैरर्थिता नालमस्मिन्
व्यक्तं वक्तुं नलिनमुखि ! नौ तानुदारान् विहारान् ॥ ७८ ॥

इत्थंकारं त्वयि विनिहितैः सूक्तिपुष्पोपहारै-
र्दीनामस्मत्प्रियसहचरीं भ्रातरामोदयेथाः ।
किन्त्वस्माकं समुपगमनात् पूर्वमेकत्र यात्रां
नैवेच्छामि प्रियसख ! न चेदस्ति कार्यातिपातः ॥ ७९ ॥

आपन्मित्रं मम हरिपदाम्भोजभक्तं दयालुं
त्वामाराध्य व्यसनवितातिः स्यन्दतां दूरदूरे ।

भूयादेवं प्रियसख! पुनर्दर्शनं मा वियोगः
स्वप्नेऽपि स्याद् भवतु युवयोः सर्वमङ्गल्यलक्ष्मीः ॥ ८० ॥

इति भृङ्गसन्देशे उत्तरभागः।
भृङ्गसन्देशः समाप्तः॥

सन्देशेऽस्मिन् कथमपि गुरुश्रीपदाम्भोजयुग्म-
ध्यानोद्भूतप्रबलतमसा वासुदेवेन बद्धे।
पूर्णे दोषैरपि यदि गुणानां क(णाः) संप्रथेर-
न्नेतान् प्रीत्या मनसि परिगृह्णन्तु सन्तो महान्तः

शुभं भूयात।

THE

PRINCESS OF WALES

SARASVATI-BHAVANA TEXTS

No.

EDITED BY

[illegible]

OF

DHARMA VIJAYA NĀTAKA

[illegible]

1930

[illegible]

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
7251

श्रीमद्भूदेवराङ्कविर्विरचित

भर्मविजयनाटक

[illegible]

॥ श्री ॥

धर्मविजयनाटकम्

उपोद्घातः

[illegible]

[illegible]

[illegible]

[illegible]

9251

THE

PRINCESS OF WALES

SARASWATĪ-BHAVANA TEXTS

No. 35.

EDITED BY

GOPĪNĀTHA KAVIRĀJA

THE DHARMA VIJAYA NĀTAKA

Printed by Jai Krishna Das Gupta

At the Vidya Vilas Press, Gopal Mandir Lane,

Benares City.

1930

Saleable at half of the printed price

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
M
7251

श्रीमद्भूदेवशुक्लविरचितं

धर्मविजयनाटकम्

राजकीयसंस्कृतपाठशाला-सरस्वतीभवनोपाध्यक्षेण साहित्याचार्य-
पदालङ्कृतेन श्रीमता नारायणशास्त्रिखिस्तेशर्मणा संस्कृतम् ।

THE

DHARMA VIJAYA NĀTAKA

By

BHŪDEVA S'UKLA

Edited with Introduction etc.

BY

SĀHITYĀCHARYA
PANDIT NĀRĀYAṆA S'ĀSTRĪ KHISTE,
Assistant Librarian, Government Sanskrit College,
Sarasvatī Bhavana Library, Benares.

1930.

॥ श्रीः ॥

धर्मविजयनाटकस्य

उपोद्घातः

अथेदमुपक्रम्यते 'धर्मविजयं' नाम नाटकं संमुद्य प्रकाशयितुम्। अस्य निर्माता किल प्रसिद्धो विपश्चिन्नैकनिबन्धनिर्माता श्रीमान् भूदेवशुक्लः। नाटकमिदमद्यावधि काव्यमुद्रितं धर्मविप्लवदूरीकरणोपायप्रदर्शकमिति वर्तमानकाले सम्यगुपयोगितामस्य सम्भावयता मया काव्यरसिकानां करकमलेपूपायनीक्रियते।

कान्तासम्मिततया सदुपदेशकरणमेव हि काव्यस्य मुख्यं व्यावहारिकं प्रयोजनम्। तच्च श्रव्यकाव्यापेक्षया दृश्यकाव्यद्वारा समधिकं चारुतया सम्पाद्यते इत्यप्यतिरोहितमेव प्रेक्षवताम्। पापस्य नरकजनकत्वं शतकृत्वः श्रुत्वाऽपि यावती पापपराङ्मुखी वृत्तिश्चेतसि समुदेति, तदपेक्षयाऽपि प्रबला चेतोवृत्तिः पापिनो नरके निपातम्, तत्र तस्य दुःसहक्लेशभोगित्वं सकृदपि निरीक्ष्य समुदेतीत्यनुभवो विदुषाम्। इत्थमेव सदुपदेशदानं दृश्यकाव्यद्वाराऽभ्यभिचरितफलं सम्पादितं भवति। तदेव दृश्यकाव्यं नाट्यमित्यभिधीयते। महर्षिणा भरतेन साङ्गोपाङ्गस्य तस्यैव प्रपञ्चनं स्वकीये नाट्यशास्त्रे कृतम्। पश्चाद्वाविभिर्नैकैर्विद्वद्भिस्तदेव स्वस्वनिबन्धेषु स्वस्वबुद्धिवैभवानुसारेण विस्तरेण सप्रभेदं सोदाहरणञ्च निरूपितम्।

'अवस्थानुकृतिर्नाट्यम्' इति हि नाट्यलक्षणं दशरूपकादौ निर्दिष्टम्। अनुकरणमेव हि नाट्यम्। अनुकरणञ्च वास्तविक्या अवस्थाया एव सम्भवति, न तु कल्पितायाः। तथा च वास्तविकावस्थानुकरणं नाट्यमिति फलति। तत्र सदुपदेशकरणात्मकमुख्यव्यावहारिकफलानुसन्धानेन सत्कर्मणां शोभनं फलप्रसत्कर्मणामशोभनञ्च फलं कविना